लक्ष्यं विश्वमानम्

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2024

## SANACOR13T-SANSKRIT (CC13)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

**सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।**

### SECTION-A

**[Marks-10]**

1. अधोलिखितेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। — 2×5 = 10

(क) भारतीय-दर्शन सम्प्रदायेषु आस्तिक-नास्तिक दर्शनयोः भेदकारणं लिख्यताम्। के तावत् आस्तिकाः भवन्ति?

(ख) न्यायदर्शने कारणानि कतिविधानि? कानि च तानि?

(ग) के खलु असत्कार्यवादिनः? असत्कार्यवादस्य आशय एकवाक्येन लिख्यताम्।

(घ) 'परिणामवादः' इत्यनेन किमुच्यते? अस्य उदाहरणमेकं दीयताम्।

(ङ) वौद्धमते रत्नत्रयं किम्?

(च) सांख्यदर्शनस्य प्रवक्ता कः? सांख्यकारिकायाः रचयिता कः?

(छ) शङ्कराचार्यमते वेदान्तस्य मुख्यं वक्तव्यं किम्?

### SECTION-B

**[Marks-20]**

2. अधोलिखितेषु यथेच्छम् ***एकः*** प्रश्नः समाधेयः। — 10×1 = 10

(क) तर्कसंग्रहानुसारेण समवायस्य किं लक्षणम्? संयोगसमवाययोर्मध्ये पार्थक्यं लेख्यम्।

(ख) को नाम विशेषः? विशेषस्वीकारे का युक्तिः?

(ग) किं नाम कर्म? तानि कतिविधानि? कानि च तानि? कर्मभेदाः आलोचनीयाः।

3. (क) अधोलिखितेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीका लेख्या। — 5×2 = 10

अत्यन्ताभावः, मनः, सामान्यम्।

**अथवा**

(ख) अधोलिखितेषु यथेच्छं ***द्वयमाश्रित्य*** व्याख्यां लिखत। — 5×2 = 10

(i) गन्धवती पृथिवी।

(ii) ज्ञानाधिकरणमात्मा ।

(iii) शीतस्पर्शवत्य आपः ।

## SECTION-C

**[Marks-20]**

4. अधोलिखितेषु ***यथेच्छमेकः*** प्रश्नः समाधेयः । 10×1 = 10

(क) को नाम सन्निकर्षः ? सन्निकर्षभेदाः सोदाहरणं व्याख्यायन्ताम् ।

(ख) प्रत्यक्षं कतिविधम् ? तर्कसंग्रहानुसारं प्रत्यक्षलक्षणं विचार्यताम् ।

(ग) का नाम व्याप्तिः ? व्याप्तिस्वरूपं तर्कसंग्रहमाश्रित्य संक्षेपेण वर्णनीयम् ।

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

5. (क) अधोलिखितेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीकां लिखत । 5×2 = 10

हेत्वाभासः, पक्षः, यथार्थानुभवः ।

**अथवा**

(ख) अधोलिखितेषु यथेच्छं ***द्वयमाश्रित्य*** व्याख्यां लिखत । 5×2 = 10

(i) असाधारणं कारणम् करणम् ।

(ii) आप्तवाक्यं शब्दः ।

(iii) अनुमानं द्विविधं — स्वार्थं परार्थं च ।

——×——